# ॥ श्री भवानी कवचम् ॥
# ▯ Shri Bhawani Kavach ▯

॥ ॐ गण गणपतये नमः ॥

॥ श्री पार्वत्युवाच ॥
भगवन् सर्वमाख्यातं मन्त्रं यन्त्रं शुभ प्रदम् ।
भवान्याः कवचं ब्रूहि यद्यहं वल्लभा तव ॥१॥

॥ ईश्वर उवाच ॥
गुह्याद्गुह्यतरं गोप्यं भवान्याः सर्वकामदम् ।
कवचं मोहनं देवि गुरुभक्त्या प्रकाशितम् ॥२॥
राज्यं देयं च सर्वस्वं कवचं न प्रकाशयेत् ।
गुरु भक्ताय दातव्यमन्यथा सिद्धिदं नहि ॥३॥

ॐ अस्य श्रीभवानी कवचस्य सदाशिव ऋषिरनुष्टुप
छन्दः,मम सर्वकामना सिद्ध्यर्थे श्रीभवानी त्रैलोक्यमोहनकवच
पाठे विनियोगः पद्मबीजाशिरः पातु ललाटे पञ्चमीपरा ।
नेत्रे काम प्रदा पातु मुखं भुवन सुन्दरी ॥४॥

नासिकां नारसिंही च जिह्वां ज्वालामुखी तथा ।
श्रोत्रे च जगतां धात्री करौ सा विन्ध्यवासिनी ॥५॥
स्तनौ च कामकामा च पातु देवी सदाशुचिः ।
उदरं मोहदमनी कण्डली नाभमण्डलम् ॥६॥

पार्श्वं पृष्ठकटी गुह्यस्थाननिवासिनी ।
ऊरू मे हिङ्गुला चैव जानुनी कमठा तथा ॥७॥
पादौ विघ्नविनाशा च अङ्गुलीः पृथिवी तथा ।
रक्ष-रक्ष महामाये पद्मे पद्मालये शिवे ॥८॥

वाञ्छितं पूरयित्वा तु भवानी पातु सर्वदा ।

य इदं कवचं देव्या जानाति सच मन्त्रवित् ॥९॥
राजद्वारे श्मशाने च भूतप्रेतोपचारिके ।
बन्धने च महादु:खे पठेच्छत्रुसमागमे ॥१०॥

स्मरणात्कवचस्यास्य निर्भयो जायते नर: ।
प्रयोगमुपचारस्य भवान्या: कर्तुमिच्छति ॥११॥
कवचं प्रपठेदादौ तत: सिद्धिमवाप्नुयात् ।
भूर्जपत्रे लिखित्वा तु कवचं यस्तुधारयेत् ॥१२॥

देहे च यत्र कुत्रापि सर्व सिद्धिर्भवेन्नर: ।
शस्त्रास्त्रस्य भयं नैव भूतादि भयनाशनम् ॥१३॥
गुरु भक्तिं समासाद्य भवान्यास्तवनं कुरु ।
सहस्र नाम पठने कवचं प्रथमं गुरु ॥१४॥

नन्दिने कथितं देवि तवाग्रे च प्रकाशितम् ।
सागन्ता जायते देवि नान्यथा गिरिनन्दिनि ॥१५॥
इदं कवचमज्ञात्वा भवानीं स्तौतियो नर: ।
कल्प कोटि शतेनापि नभवेत्सिद्धिदायिनी ॥१६॥

**॥ इति श्री भवानी कवचं सम्पूर्णम् ॥**